नारदपत्नी। (यथा, महाभारते।५।११७।१५।
"दमयन्त्यां नलश्चैव सत्यवत्याश्च नारदः॥")
ऋचीकमुनिपत्नी। इति मेदिनी॥ (यथा, हरिवंशे। २७। १८।
"गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा।
तां गाधिः काव्यपुत्राय ऋचीकाय ददौ प्रभुः॥"
सत्यविशिष्टे, त्रि॥ यथा, भागवते।४।२१।४६।
"पुत्रेन जयते लोकानिति सत्यवती श्रुतिः।
ब्रह्मदण्डहतः पापी यद्वेणोऽत्यतरत्तमः॥")
ऋचीकपत्न्याः प्रमाणान्तरं यथा,—
"ब्रह्मपुत्त्रो भृगुर्नाम ऋचीकस्तत्सुतोऽभवत्।
स भार्य्यार्थी चरन् भूमौ कान्यकुब्जं गतः पुरा॥
ददर्श चारण्यगतं जह्नोर्वंशसमुद्भवम्।
कुशिकस्य सुतं गाधिं तपस्यं नृपसत्तमम्॥
अरण्यस्थस्य तस्याथ पुत्रकामस्य भूभृतः।
सभार्य्यस्य सुता जज्ञे देवकन्यासमा गुणैः॥
ऋचीको भृगुपुत्त्रस्तां भार्य्यार्थं समयाचत।
गाधिं नृपतिशार्द्दूलं स चोवाच नृपो मुनिम्॥
एकतः श्यामकर्णानामश्वानां चन्द्रवर्च्चसाम्।
सहस्रमेकं यो दद्यात्तस्मै पुत्त्री प्रतीयते॥
ऋचीक उवाच।
दास्याम्यश्वसहस्रन्तु तव राजंस्तथाविधम्।
कञ्चित्कालं प्रतीक्षस्व यावत्तदहमानये॥
गङ्गाजलादुत्थितन्तु दत्तं सम्यक् प्रचेतसा।
आदायाश्वसहस्रं स मुनिर्गाधिमथाभ्ययात्॥
तानश्वान् गाधिरादाय पुत्त्रीं सत्यवतीं स्वकाम्
ऋचीकाय ददौ लक्ष्मीं केशवायेव सागरः॥
ऋचीको गाधितनयां लब्ध्वा भार्य्यामनिन्दिताम्
मुदितः स तया रेमे यथाकामं स्वमाश्रमे॥
कृतदारं सुतं श्रुत्वा द्रष्टुं पुत्त्रं स्वकं भृगुः।
अथाजगाम मतिमान् स्नुषां दृष्ट्वा ननन्द च॥
दम्पती तं समासीनं भृगुं देवगणार्च्चितम्।
पूजयित्वा समासीनं तस्थतुस्तौ कृताञ्जली॥
ततो भृगुः स्नुषां स्वीयां सुप्रीत इदमब्रवीत्।
वरं वृणीष्व दास्यामि वाञ्छितं वरवर्णिनि।
अदेयं दुष्करं वापि यत्र ते वर्त्तते स्पृहा॥
ततः सत्यवती पुत्त्रं तप आम्नायपारगम्।
मातुश्च वीरमतुलं पुत्त्रं वरमयाचत॥
स चैवमस्त्वित्युक्त्वैव भूत्वा ध्यानपरस्तदा।
विश्वमावल्य मनसा यत्नात् श्वासं ससर्ज्ज स.॥
तस्य निःश्वासवातात्तु निःसृतं वै चरुद्वयम्।
तस्यै तत् द्वितयं दत्त्वा भृगुस्तामिदमब्रवीत्॥
चरुद्वयं गृहाण त्वं स्नुषे सत्यवति स्वयम्।
स्नात्वा ऋतौ ऋतौ माता तदा त्वञ्च करिष्यथः॥
आलिङ्ग्याश्वत्थवृक्षं ते माता पुंसवनाय वै।
चरुमारक्तकं चरुं सा भोक्ष्यति सुतस्ततः॥
त्वञ्चोडुम्बरवृक्षन्तु समालिङ्ग्य सितं चरुम्।
भक्षस्वैतेन पुत्त्रस्ते भविष्यति सनातनः॥
एवमुक्त्वा भृगुर्यातो यथेच्छं सापि संमुदम्।
अवाप माता दुहिता भर्त्ता पिता च भाविनी॥
अथ स्नानदिनेऽश्वत्थमालिङ्ग्यारक्तकं चरुम्।
अश्नात् सत्यवती तस्या माता फलं सितं चरुम्॥ * ॥
परिवर्त्तन्तु तं ज्ञात्वा दिव्यज्ञानी भृगुर्म्मुनिः।
अथागत्य स्नुषां तान्तु वचनञ्चेदमब्रवीत्॥
विपर्य्ययस्त्वया भद्रे वृक्षालिङ्गनकर्म्मणि।
तथा चरुप्राशने च तत्रेदन्ते भविष्यति॥
ब्राह्मणः क्षत्त्रियाचारस्तव पुत्त्रो भविष्यति।
क्षत्त्रियो ब्राह्मणाचारो मातुस्ते भविता सुतः॥
इत्युक्ता भृगुणा साध्वी तदा सत्यवती भृगुम्।
पुनः प्रसादयामास पौत्त्रो मेऽस्त्विति तादृशः।
एवमस्त्विति प्रोक्ता स तत्रैवान्तर्दधे भृगुः॥
अथ काले सुतं दीप्तं जमदग्निञ्च गाधिजा।
सुषुवे जननी तस्या विश्वामित्रं तपोधनम्॥
जमदग्निस्ततो वेदान् चतुरः प्राप मा चिरम्।
प्रादुरासद्धनुर्व्वेदः स्वयं तस्मिन् महात्मनि॥
विश्वामित्रोऽपि सकलान् वेदानपि तथाचिरात्
धनुर्व्वेदं तथा कृत्स्नं विप्रश्चाभूत्तपोधनः॥
जाज्वल्यमानस्तेजस्वी जमदग्निर्महातपाः।
वेदैस्तपोभिः स मुनोनत्यक्रामच्च सूर्य्यवत्॥"
इति श्रीकालिकापुराणे जामदग्न्योपाख्याने ८४ अध्यायः॥
सत्यवतीसुतः, पुं, (सत्यवत्याः सुतः।) व्यासः। इति शब्दरत्नावली॥ (यथा, महाभारते। १। १५७। १२।
"एवं स तान् समाश्वास्य व्यासः सत्यवतीसुतः।
एकचक्रामभिगतः कुन्तीमाश्वासयत् प्रभुः॥"
जमदग्निः। इति पुराणम्॥)
सत्यवाक्, [च्] पुं, (सत्या वाक् यस्य।) ऋषिः। इति शब्दरत्नावली॥ (कश्यपपत्न्या मुनेः पुत्त्रविशेषः। यथा, महाभारते। १। ६५। ४३।
"सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः॥")
काकः। इति त्रिकाण्डशेषः॥ (सावर्णमनुपुत्त्रविशेषः। यथा, मार्कण्डेये। ८०। ११।
"विरजाश्चार्व्ववीरश्च निर्म्मोहः सत्यवाक् कृतिः।
विष्ण्वाद्याश्चैव तनयाः सावर्णस्य मनोर्नृपाः॥")
सत्यवादिनि, त्रि॥ (यथा, रामायणे। २। २८। ११।
"कालश्चायं समुत्पन्नः सत्यवाग् भवतु द्विजः॥"
सत्यवादी, [न्] त्रि, (सत्यं वदतीति। वद् + णिनिः।) यथार्थवक्ता। तत्पर्य्यायः। सत्योद्यः २। इति शब्दमाला॥ (यथा, महानिर्व्वाणतन्त्रे। ३। ८८।
"अस्मिन् धर्म्मे महेशि! स्यात् सत्यवादी जितेन्द्रियः।
परोपकारनिरतो निर्व्विकारः सदाशयः॥")
सत्यवान्, [त्] पुं, (सत्यमस्त्यस्येति। सत्य + मतुप्। मस्य वः।) राजविशेषः। स तु सावित्रीपतिः। इति मेदिनी॥ (अस्य नामनिरुक्तिर्यथा, महाभारते। ३। २९३। १२।
"सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते।
ततोऽस्य ब्राह्मणाश्चक्रुर्नामैतत् सत्यवानिति॥"
अस्य विशेषवृत्तान्तस्तु तत्रैव २९२ अध्यायमारभ्य द्रष्टव्यः॥ * ॥ चाक्षुषमनुपुत्त्रविशेषः। यथा, भागवते। ४। १३। १६।
"स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह।
मनोरसूत महिषी विरजान्नड्वला सुतान्।
पुरुं कुत्समृतं द्युम्नं सत्यवन्तं ऋतं व्रतम्॥"
सत्यवति. त्रि॥ (यथा, महाभारते। १३। ७५। ३४।
"सत्यवन्तः स्वर्गलोके मोदन्ते भरतर्षभ॥")
सत्यवृत्तः, त्रि, (सत्यं वृत्तं यस्य।) सत्यवादी। इति केचित्॥ (सच्चरित्रे क्ली। यथा, महाभारते। १३। ७३। ११।
"यावज्जीवं सत्यवृत्ते रतश्च
दाने रतो यः क्षमी चापराधे॥")
सत्यव्रतः, पुं, (सत्यमेव व्रतं यस्य।) त्रेतायुगे सूर्य्यवंशीयपञ्चविंशराजः। यथा,—
"त्रिधन्वनः सुतो जातस्त्रय्यारुण इति स्मृतः।
तस्य सत्यव्रतो नाम तस्मात् सत्यरतः स्मृतः॥"
इति मात्स्ये १२ अध्यायः॥
स च त्रिशङ्कुराजः। यथा,—
"त्रिधन्वनस्त्रय्यारुणस्त्रय्यारुणात् सत्यव्रतः। योऽसौ त्रिशङ्कुसंज्ञामवाप चाण्डालतामुपगतश्च द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रस्य कलत्रापत्यपोषणार्थं चाण्डालपरिग्रहपरिहरणार्थञ्च जाह्नवीतीरे न्यग्रोधे मृगमांसमनुदिनं ववन्ध। परितुष्टेन च विश्वामित्रेण सशरीरः स्वर्गमारोपितः। त्रिशङ्कोर्हरिश्चन्द्रः।" इतिविष्णुपुराणे ४ अंशे २ अध्यायः॥ (धृतराष्ट्रस्य पुत्त्रविशेषः। यथा, महाभारते।१।६३।११७।
"जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत॥"
महादेवः। इति महाभारतम्।१३।१७।१५०॥
सत्यरूपव्रते, क्ली। यथा, रामायणे।२।२६।३७।
"सा त्वं वसेह कल्याणि राज्ञः समनुवर्त्तिनी।
भरतस्य रता धर्म्मे सत्यव्रतपरायणा॥"
सत्यव्रतविशिष्टे, त्रि। यथा, हरिवंशे।३१।५८।
"एतेऽपि वंशजाः सर्व्वे राजानः कीर्त्तिता मया।
सत्यव्रता महात्मानः प्रजावन्तो महारथाः॥")
सत्यसङ्काशः, त्रि, (सत्यस्य सङ्काशः सदृशः।) सत्यसन्निभः। इति केचित्॥
सत्यसङ्गरः, पुं, (सत्यः सङ्गरः प्रतिज्ञा युद्धं वा यस्य।) कुबेरः। इति त्रिकाण्डशेषः॥ अन्यायरहितयुद्धञ्च॥ (ऋषिविशेषः। इति महाभारतम्। २। ७। १५॥)
सत्यसन्धः, पुं, (सत्य सन्धा अभिसन्धिर्यस्य।) रामानुजभरतः। जनमेजयः। इति शब्दरत्नावली॥ (विष्णुः। इति महाभारतम्। १३। १४९। ६७॥ धृतराष्ट्रपुत्त्रः। इति च महाभारतम्। १। ११७। ८॥) सत्यप्रतिज्ञे, त्रि॥ यथा,—
"राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्त्तिं